# अथ शिवसूत्राणि

## अथ शाम्भवोपायख्यप्रथमोल्लास:

१ चैतन्यमात्मा
२ ज्ञानं बन्ध:
३ योनिवर्ग: कलाशरीरं
४ ज्ञानाधिष्ठानं मातृका
५ उद्यमो भेरव:
६ शक्तिचक्रसंधाने विश्वसंहार:
७ जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभव:
८ ज्ञानं जाग्रत्
९ स्वप्नो विकल्प:
१० अविवेको मायासौषुप्तम्
११ त्रितयभोक्ता वीरेश:
१२ विस्मयो योगभूमिका:
१३ इच्छाशक्तिरुमा कुमारी
१४ दृश्यं शरीरं
१५ हृदये चित्तसंघट्टाद्दृश्यस्वापदर्शनम्
१६ शुद्धतत्त्वानुसंधानाद्वा
१७ स्वपदशक्ति:
१८ वितर्क आत्मज्ञानं
१९ लोकानन्द: समाधिसुखं
२० शक्तिसंधाने शरीरोत्पत्ति:
२१ भूतसंधान-भूमपृथक्त्व-विश्वसंघट्टा:
२२ शुद्धविद्योदयाच्चक्रेशत्वसिद्धि:
२३ महाह्रदानुसंधानान्मन्त्रवीर्यानुभव:

## अथ शाक्तोपायाख्यद्वितीयोल्लास:

१ चित्तं मन्त्र:
२ प्रयत्न: साधक:
३ विद्याशरीरसत्ता मंत्ररहस्यं
४ गर्भे चित्तविकासोऽविशिष्टविद्या स्वप्न:
५ विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था
६ गुरुरुपाय:
७ मातृकाचक्रसंबोध:
८ शरीरं हवि:
९ ज्ञानमन्नं
१० विद्यासंहारे तदुत्थस्वप्नदर्शनं

## अथ आणवोपायाख्यतृतीयोल्लास:

१ आत्मा चित्तं
२ ज्ञानं बन्ध:
३ कलादीनां तत्त्वानामविवेको माया
४ शरीरे संहार: कलानां
नाडीसंहार–भूतजय–भूतकैवल्य–
५ भूतपृथक्त्वानि
६ मोहावरणात्सिद्धि:
७ मोहजयादनन्ताभेगात्सहजविद्याजय:
८ जाग्रद् द्वितीयकर:
९ नर्तक आत्मा
१० रंगोऽन्तरात्मा
११ प्रेक्षकाणीन्द्रियाणि
१२ धीवशात्सत्त्वसिद्धि:
१३ सिद्ध: स्वतन्त्रभाव:
१४ यथा तत्र तथाऽन्यत्र
१५ विसर्ग स्वाभाव्यादबहि:स्थितेस्तत्स्थिति:
१६ बीजावधानम्
१७ आसनस्थ: सुखं ह्रदे निमज्जति
१८ स्वमात्रानिर्माणमापादयति
१९ विद्याऽविनाशे जन्मविनाश:
२० कवर्गादिषु माहेश्वर्याद्या: पशुमातर:
२१ त्रिषु चतुर्थ तैलवदासेच्यम्
२२ मग्न: स्वचित्तेन प्रविशेत्
२३ प्राणसमाचारे समदर्शनम्
२४ मध्येऽवरप्रसव:
२५ मात्रासु स्वप्रत्ययसंधाने नष्टस्य पुनरुत्थानम्
२६ शिवतुल्यो जायते



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

२७ शरीरवृत्तिर्व्रतम्

२८ कथा जपः

२९ दानमात्मज्ञानम्

३० योऽविपस्थो ज्ञाहेतुश्च

३१ स्वशक्तिप्रचयोऽस्य विश्वम

३२ स्थितिलयौ

३३ तत्प्रवृत्तावप्यनिरासः संवेत्तृभावात्

३४ सुखासुखयोर्बहिर्मननम्

३५ तद्विमुक्तस्तु केवली

३६ मोहप्रतिसंहतस्तु कर्मात्मा

३७ भेदतिरस्कारे सर्गान्तरकर्मत्वम्

३८ करणशक्तिः स्वतोऽनुभवात्

३९ त्रिपदाद्यनुप्राणनम्

४० चित्तस्थितिवच्छरीरकरणबाह्येषु

४१ अभिलाषाद् बहिर्गतिः संबाह्यस्य

४२ तदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः

४३ भूतकंचुकी तदा विमुक्तो भूयः पतिसमः पर

४४ नैसर्गिकः प्राणसंबंधः

४५ नासिकान्तर्मध्यसंयमात्किमत्र
सव्यासव्यसौषुम्नेषु

४६ भूयः स्यात्प्रतिमीलनम्



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM